Shodhshauryam, International Scientific Refereed Research Journal
© 2020 SHISRRJ | Volume 3 | Issue 5 | ISSN : 2581- 6306

# उपसर्गाः

**डॉ0 सन्तोष माझी**
सहाध्यापकः, व्याकरणविभागः राष्ट्रियसंस्कृतविद्यालयः, तिरुपतिः (आ. प्र.)

**Article Info**
Volume 3, Issue 5
Page Number : 324-329
**Publication Issue :**
September-October-2020
**Article History**
Accepted : 20 Sep 2020
Published : 30 Sep 2020

**सारांशः** – माहेश्वरप्रसादात्प्राप्तमक्षरसमाम्नायम् आधारीकृत्य हि महर्षि पाणिनिः व्याकरणं व्यरचयत्। तच्च सूत्रात्मकं महत् विद्यते। स च व्याकरणग्रन्थः "अष्टाध्यायी" इति प्रसिद्धः। अस्याम् अष्टाध्याय्याम् ऊनचत्वारिंशत्-शताधिकत्र्यशीति (3983) सूत्राणि विद्यन्ते। अन्यव्याकरणानामपेक्षया पाणिनीयव्याकरणस्य प्रसारः सम्प्रति दृश्यते। तत्र च कारणं बहूनामाचार्याणां मतान्यपि अत्र संगृहीतानि। वैदिकानां लौकिकानां शब्दानां साधुत्वम् अस्मिन् व्याकरणे निरूप्यते।

**मुख्यशब्दः- उपसर्गाः**, महर्षि पाणिनिः, व्याकरणग्रन्थः, अष्टाध्यायी वस्था।

अस्मिन् शास्त्रे नामाख्यातउपसर्गनिपातत्वेन चातुर्विध्यं लौकिकशब्दानां कृतमस्ति। निघण्टुकाराः वदन्ति यत् वैदिकशब्दानामपि "नामाख्यात उपसर्गनिपातत्वेन" विभाजनं कृतमस्ति। तदेवमाधारीकृत्य यास्कमुनिना निघण्टुव्याख्यानामसरे अर्थात् निरुक्ते उक्तमस्ति यत् –

तान्येतानि चत्वारि पदजातानि नामाख्याते च।
उपसर्गनिपाताश्च तानीमानि भवन्ति।। इति।।

तत्रैव यास्कमुनिना इदमपि उक्तम् यत् – **"तत्रैतन्नामाख्यातयोर्लक्षणम्[1]" "प्रदिशन्ति[2]" "भावप्रधानमाख्यातम्[3]" "सत्त्वप्रधानानि नामानि[4]"** इति। यच्च मतमनुसृत्य श्रीमत्कौण्डभट्टेन भूषणसारे – **'भावप्रधानमाख्यातम्' 'सत्त्व-प्रधानानि नामानि'** [5] इति निरुक्तात् भूवादिसूत्रादिस्थ-क्रियाप्राधान्यबोधकभाष्याच्च "धात्वर्थभावनाप्राधान्यम् अध्यवसीयते" इति मतमुपस्थापितम्।

'भावप्रधानम्' इत्यत्र भावपदस्यार्थः 'क्रिया'। तेन 'पचति', 'गच्छति' इत्यादीनां ग्रहणम्। आख्यातपदे क्रियांशस्य प्राधान्यता भवति। 'सत्त्व-प्रधानानि' इत्यत्र सत्त्वपदस्यार्थः 'द्रव्यम्' इति। तच्च क्रियाभिन्नम्। यथा 'पाकः', 'कृतिः' इत्यादि। यत्र लिङ्गकारकादिसम्बन्धयोग्यत्वं तदेव द्रव्यम् इत्यर्थः। एवम् प्रकारेण नामाख्यातयोः व्याख्यां कृत्वा सम्प्रति उपसर्गम् अनुसरामः।

---

1 निघण्टुः
2 तत्रैव
3 तत्रैव
4 तत्रैव
5 भूषणसारः

**Copyright:** © the author(s), publisher and licensee Technoscience Academy. This is an open-access article distributed under the terms of the Creative Commons Attribution Non-Commercial License, which permits unrestricted non-commercial use, distribution, and reproduction in any medium, provided the original work is properly cited

पाणिनिप्रणीताष्टाध्याय्यां प्रथमाध्याये चतुर्थपादे 'उपसर्गाः क्रियायोगे'[6] इति सूत्रं विद्यते। अत्र 'प्रादयः' इति अनुवर्तते। "गतिश्च"[7] इति च। एवञ्च प्रादयः क्रियायोगे उपसर्गसंज्ञाः गतिसंज्ञाश्च स्युः इति सूत्रार्थः। तद्यथा क्रियायोगे प्र, परा, अप, सम्, अनु, अव, निस्, निर्, दुस्, दुर्, वि, आङ्, नि, अधि, अपि, अपि, सु, उत्, अभि, प्रति, परि, उप एतेषाम् उपसर्गसंज्ञा भवति। सम्प्रति एते उपसर्गाः द्योतकाः उत वाचकाः इति शङ्का उदेति। तत्र बहवो मतभेदाः दृश्यन्ते। तद्यथा –

1. निरुक्ते गार्ग्य ऋषिमते – "उपसर्गाः वाचकाः"[8] इति।
2. निरुक्तकारः यास्कमुनिमते "उपसर्गाः वाचकाः"[9] इति।
3. शाकटायनमते "उपसर्गाः द्योतकाः" इति।
4. मीमांसकाः नैयायिकाश्च उपसर्गाः द्योतकाः इति वदन्ति। परन्तु एते निपाताः वाचकाः इति मन्यन्ते।
5. वैयाकरणाः उपसर्गाः निपाताश्च द्योतकाः इति मन्यन्ते।
6. वैयाकरणेषु भर्तृहरिस्तावत् मध्यममार्गानुयायी। अर्थात् ते उपसर्गाः वाचकाः द्योतकाश्च भवन्ति इति वदन्ति। तद्यथा –

**"स वाचको विशेषाणां सम्भवाद् द्योतकोऽपि वा"**[10] इति।

**उपसर्गाः वाचकाः**

उपसर्गाः वाचकाः। तद्यथा –

"उच्चावचाः पदार्था भवन्तीति" गार्ग्यः। अर्थात् उपसर्गाणां नानार्थकत्वं सिध्यतीति गार्ग्यः। अमुं प्रसङ्गम् आधारीकृत्यैव यास्कमुनिना उपसर्गाणां नानार्थकत्वं साधितम्। अत्र (निरुक्ते) यास्कमुनिना एकैकस्य उदाहरणैः एकैकः अर्थः प्रदर्शितः। तद्यथा –

**1. आङ् – 'आ' इत्यर्वागर्थे।**

आ अर्थात् आङ् उपसर्गः। 'अर्वाक्' अर्थात् समीपार्थे प्रयोगः भवति। तद्यथा – "सर्वे नन्दन्ति यशसागतेन[11]" इत्यत्र।

**2. प्र-परा – 'प्र', 'परा' इत्येतस्य प्रातिलोम्यम्।**

'प्र', 'परा' इत्युपसर्गद्वयं 'प्र' इत्युपसर्गस्य विपरीतार्थकं भवति। अर्थात् दूरार्थकः इति। तद्यथा

याश्चे दमुपशण्वन्ति याश्च दूरं परागताः।
सर्वाः सङ्गत्य वीरूधोऽस्यै सं दत्त वीर्यम्।।[12]

**3. अभि – 'अभि' इत्याभिमुख्यम्।**

'अभि' इत्युपसर्गः आभिमुख्यार्थे अथवा नम्रतार्थे प्रयुक्तः। तद्यथा –

**(अ) अभिमुखार्थे –**

---

[6] अष्टाध्यायी 1/4/59
[7] तत्रैव 1/4/60
[8] निरुक्तम्
[9] तत्रैव
[10] भर्तृहरिकारिका
[11] ऋग्वेदः 10.71.10
[12] तत्रैव 10.97.21

**न वा अरण्यानिर्हन्त्यन्यश्चेन्नाभिगच्छति।**

**स्वादोः फलस्य जग्ध्वाय यथाकामं निपद्यते।।**[13]

**(आ) नम्रतार्थकत्वे –**

“अभित्वादेव सवितरीशानं वार्च्याणाम् सदावन्भागमीमहे”[14]

**4. प्रति – ‘प्रति’ इत्येतस्य प्रातिलोम्यात्**

अर्थात् ‘प्रति’ इत्युपसर्गः ‘अभि’ इत्युपसर्गस्य विपरीतार्थक इत्यर्थः। अर्थात् दूरार्थकः। तद्यथा

**अग्ने मन्युं प्रतिनुदन्परेषामदब्धो गोपाः परि पाहि नस्त्वम्।**

**प्रत्यञ्चो यन्तु निगुतः पुनस्तेऽश्चैषां चित्तं प्रबुधां वि नेशत्।।**[15]

**5. ‘अति’, ‘सु’ – ‘अति’, ‘सु’ इत्यभिपूजितार्थे।**

अर्थात् ‘अति’, ‘सु’ इत्युपसर्गद्वयं प्रशंसापरकं भवति। तद्यथा –

(अ) ‘अति’ – यः परस्याः परावतस्तिरोधन्वातिरोचते स नः पर्षदति द्विषः।[16]

(आ) ‘सु’ – सुदेवो असि वरुण यस्य ते सप्त सिन्धवः अनुक्षरन्ति काकुदं सूर्म्यं सुषिरामिव।[17]

**6. ‘निर्’, ‘दूर्’ – ‘निर्’, ‘दुर्’ इत्युपसर्गद्वयम् ‘अति’, ‘सु’ इत्युपसर्गद्वयस्य विपरीतार्थकः भवति। अर्थात् निन्दार्थकः तद्यथा**

**(अ) ‘निर्’ –**

**युवमेतं चक्रथुः सिन्धुषु प्लवमात्मन्वन्तं पक्षिणं तौग्रयायकम्**

**येन देवत्रा मनसा निरूहथुः सुपप्तनी पेतथुः क्षोदसो महः।।**[18]

**(आ) ‘दुर्’ –**

**आ भूरिपाशावनृतस्य सेतु दुरत्येतू रिपवे मर्त्याय**

**ऋतस्य मित्रावरुणा पथा वामपो न नावा दुरिता तरेम।।**[19]

**7. ‘नि’, ‘अव’ - ‘नि’, ‘अव’ इति विनिग्रहार्थीयौ।**

अर्थात् ‘नि’, ‘अव’ इत्युपसर्गद्वयं अभुभूत इत्यर्थे भवति। तद्यथा –

(अ) ‘नि’ –

उदग्ने तिष्ठ प्रत्या तनुषअव न्यमित्रौ औषतात्तिग्महेतै

यो नो अरातिं समिधानं चक्रे नीचा तं धक्ष्यतसं नशुष्कम्।[20]

---

[13] ऋग्वेदः 10.146.5

[14] तत्रैव 1.24.3

[15] तत्रैव 10.128.6

[16] तत्रैव 10.187.2

[17] तत्रैव 8.69.22

[18] ऋग्वेदः 1.18.2.5

[19] तत्रैव 7.65.3

[20] तत्रैव 4.4.4.

(आ) 'अव' –

ऊर्ध्वौ भव प्रति विध्याध्यस्मदाविष्कृणुष्व दैव्यान्यग्ने
अव स्थिरा तनुहि यातुजूनां जामिमर्जामि प्रमृणीहिशत्रून्।।[21]

**8. उत – 'उत' इत्येतयोः प्रातिलोम्यम्।**

'उत' उपसर्गः 'नि', 'अव' इत्युपसर्गद्वयस्य विपरीतार्थकः अरथात् उत्थार्थकः इत्यर्थः। तद्यथा –

"उदग्ने तिष्ठ प्रत्या .................. न शुष्कम्"[22]

**9. सम् - 'सम्' इत्येकीभावम्।**

अर्थात् 'सम्' इत्युपसर्गाः ऐक्यभावार्थकः। तद्यथा –

**संगच्छध्वं सं वदध्वं संवो मनांसि जानताम्।**
**देवा भागं यथा पूर्वे सञ्जानाना उपासते।।[23]**

**10. 'वि', 'अपि' - 'वि', 'अपि' इत्येतस्य प्रातिलोम्याम्।**

अर्थात् 'वि', 'अपि' इत्युपसर्गद्वयम् 'सम्' –

(अ) वि –

मृगो न भीमः कुचरो गिरिष्ठाः परावत् आ जगन्था परस्याः
सृकं संशाय विमिन्द्र तिग्मं वि शत्रून्ताकि हवि मृध नुदस्व।।[24]

(आ) अप –

आराच्छत्रमप बाधस्व दुरमुग्रो यः शम्बव पुरूहूतः तेन अस्म
धेहि यमवद् गोमदिन्द्र कृधीधियं जरित्रे वाजरत्नाम्।।[25]

**11. अनु – अनु इति सादृश्यपरभावम्।**

अर्थात् अनु इत्युपसर्गः सादृश्यार्थकः। तद्यथा –

**(अ) अनु सादृश्यार्थकत्वे –**

**सद्यो जातस्य ददृशानमाजो यदस्य वातो अनुवाति शोचिः।**
**वृणक्ति तिग्मातमसेषु जिह्वां स्थिरा चिदन्ना दयते वि जम्भैः।।[26]**

**(आ) अनु पश्चातार्थकत्वे –**

**सहस्तोमाः सदृछन्दसः आवृः सहप्रभा ऋषयः सप्त दैव्याः।**
**सर्वेषां पन्थानमुदृश्य धीरा अन्वालेभिरे रथ्योश्च रश्मीन्।।[27]**

---

[21] तत्रैव 4.4.5

[22] तत्रैव 4.4.4.

[23] ऋग्वेदः 10.191.2

[24] तत्रैव 10.180.2

[25] तत्रैव 10.42.7

[26] तत्रैव 4.7.10

**12. अपि - 'अपि' इति संसर्गः।**

अर्थात् 'अपि' इत्युपसर्गः संसर्गार्थकः। तद्यथा उतस्य वाजी क्षिपणिं तुरण्यति ग्रीवायां बद्धो अपिकक्ष आसनि। क्रतुं दधिक्रा अनु सन्तवीत्वत्पथामङ्कास्यन्वीपनीफणत्।।[28]

**13. उप - 'उप' इत्युपजनम्।**

अर्थात् 'उप' इत्युपसर्गः वृद्ध्यार्थे प्रयुक्तः। तद्यथा –

आ द्या ता गच्छानुत्तरा युगानि यत्र जामयः कृष्णवन्नजामि।
उप बर्बृहि वृषभाय बाहुमन्यमिच्छस्व सुभगे पतिं मत्।।

**14. परि - 'परि' इति सर्वतोभावम्।**

अर्थात् 'परि' इत्युपसर्गः सर्वतोभावः इत्यर्थे प्रयुक्तः। तद्यथा –

परितो षिञ्चता सुतं सोमो य उत्तमं हविः।
दधन्वो ययो नयी अपन्वन्तरा सुषाव सोममद्रिभिः।।[29]

**15. अधि - 'अधि' इत्युपरिभावे ऐश्वर्ये वा**

'अधि' इत्युपसर्गः परिभावः। ऐश्वर्यार्थकश्च भवति। तद्यथा –

**(अ) ऐश्वर्यार्थकत्वे –**

**हिरण्यशृङ्गऽयो अस्य पादा मनोजवा अवर इन्द्र आसीत्।**
**देवा इदस्य हविरद्यमायन्यो अर्वन्तं प्रथमो अध्यतिष्ठत्।।[30]**
**किं स्विद्वनं क उ स वृक्ष आस यतो द्यावापृथिवी निषृतक्षुः।**
**मनीषिणो मनसा पृच्छतेदु तद्यदध्यतिष्ठद्भुवनानि धारयन्।।[31]**

**"एकमुच्चावयानर्थान् प्राहुः।"** अर्थात् एवम् प्रकारेण उपसर्गाणां वाचकत्वमिति सिद्धान्तः श्रीमद् यास्कमुनिना विविधवैदिकमन्त्राणामुपस्थापनपुरस्सरं प्रत्यपादि।

किन्तु वैयाकरणाः उपसर्गाः द्योतकाः इति मन्यन्ते। तद्यथा –

**उपसर्गाः द्योतकाः –** धातुपाठे भू सत्तायाम्, एध वृद्धौ, अद भक्षणे, हु दानादानयोः, दिवु क्रीडाविजिगीषाव्यवहार-द्युतिस्तुतिमोदमदस्वप्नकान्तिगतिषु, षूञ् अभिषवे, तुद व्यथने, रूधिर् आवरणे, तनु विस्तारे, चुर स्तेये इत्यादि धात्वर्थनिर्देशः कृतः। अथापि तत्र धातोः स एव अर्थः, अन्यार्थः नास्तीति न चिन्तनीयम्। धातवः अनेकार्थाः। तेषाम् अर्थाः सर्वैर्निरूपयितुमशक्यया प्रयोगेणैव ज्ञातव्याः। तत्रापि उपसर्गाणां योगेन विविधाः अर्थविशेषाः एकस्यैव भवन्ति इति निरूपयन् भट्टोजिदीक्षितेन भू धातोरेव विविधोपसर्गयोगे विभिन्नार्थबोधकत्वं कथमिति समन्वयः अकारि। तद्यथा –

---

[27] ऋग्वेदः 10.130.7
[28] तत्रैव 4.40.4
[29] तत्रैव 9.9.107.1
[30] ऋग्वेदः 1.163.9
[31] तत्रैव 10.81.4

**उपसर्गेण धात्वर्थो बलादन्यत्र नीयते।**

**प्रहाराहारसंहारविहारपरिहारवत्॥**[32]

कारिकायामस्यां हृञ् धातोः विविधोपसर्गयोगे धातुपाठनिर्दिष्ठार्थापेक्षया कथमन्यार्थबोधकत्वमिति निदर्शितं प्रहार इत्यादिना। अत्र प्रहारः – कुशाद्याघातः, आहारः – भक्षणम्, संहारः – वधः, विहारः – क्रीडा, परिहारः – परित्यागः इत्यर्थः।

एतदेव अमरेणआपि उक्तम्। तद्यथा –

**स्यादाभाषणमालापः प्रलापोऽनर्थकं वचः॥**

**अनुलापो मुहुर्भाषा विलापः परिदेवनम्।**

**विप्रलापो विरोधाक्तिः संलापो भाषणं मिथः॥**

**सुप्रलापः सुवचनम् अपलापस्तु निह्नवः।**[33]

अत्र लप धातोः उपसर्गयोगे विविधार्थाः प्रदर्शिताः। एवंरूपेण केचन **'उपसर्गा वाचकाः'** इति च मन्यन्ते।

**सहायकग्रन्थसूची**


1. **अष्टाध्यायीसहजबोधः** – पुष्पा दीक्षित, पाणिनीयशोधसंस्थान, छत्तीसगढ, 2004.
2. **ऋग्वेदसंहिता**, विद्यनिधिप्रकाशन, दिल्ली, 2004.
3. **निघण्टु**, यास्कः, श्रीमत्स्वामिदयानन्दसरस्वरीकृतशब्दानुक्रमणिकया सहितः, वैदिक पुस्तकालय अजमेर.
4. **पाणिनीय अष्टाध्यायीसूत्रपाठः** सम्पा – कृष्णदास अकादमी वाराणसी, पं सत्यनारायणशास्त्री खण्डुडी, 2012
5. **प्रौढमनोरमा**, (प्रथमो भागः) भट्टोजिदीक्षित, सम्पा. – श्रीसीतारामशास्त्री, काशी हिन्दू विश्वविद्यालयः, वाराणसी, वैक्रमाब्द – 2021
6. **भूषणसार-परमलघुमञ्जुषयोः सिद्धान्तानां समीक्षा**, डा. राममनोहरमिश्रः, सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः, वाराणसी।
7. **लघुशब्दन्दुशेखरः**, नागेशभट्टः, चौखम्बासंस्कृतप्रतिष्ठानदिल्ली – 2001.
8. **लघुशब्देन्दुशेखरः**, वाराणसी, चौखम्बा विद्याभवन, हरिनारायण तिवारी, सम्पा. – 2014.
9. **व्याकरणमहाभाष्यम्,**चौखम्बा संस्कृतप्रतिष्ठान, दिल्ली, 2021.
10. **वाक्यपदीयम् (ब्रह्मकाण्डम्)**, भर्तृहरिः, चौखम्बा विद्याभवन, वाराणसी, 2006..
11. **वैयाकरणभूषणसारः**, कौण्डभट्टः, चोखम्बासंस्कृतसिरीज्, वाराणसी, 1969.
12. **वैयाकरणसिद्धान्तकौमुदी**, (संश्रिगिरिधरशर्मा, म. म (मोतीलाल बनारसीदास, देहली, 1997.
13. **वैयाकरणसिद्धान्तकौमुदीतत्त्वबोधिनीसहिता**, चौखम्बा विद्याभवन, वाराणसी, 2006.


[32] भर्तृहरिकारिका

[33] अमरकोषः 2/6/15.16